## तस्माच्छसो नः पुंसि। (१०३/१९६)

तस्मात् पूर्वसवर्णदीर्घात् उत्तरस्य शसोऽवयवस्य सकारस्य पुंसि नकारादेशो भवति। [1]वृक्षान्। अग्नीन्। वायून्। कर्तॄन्। हर्तॄन्। षण्डकान्। षण्ढकान्। स्थूरान्। अररकान् पश्य। सर्व एते पुंलिङ्गविशिष्टं स्वार्थं प्रतिपादयन्ति। इह तु चञ्चेव चञ्चा[2], लुम्मनुष्ये (५.३.५८/२७५३) इनि कनो लुपि कृते 'लुपि युक्तवद् व्यक्तिवचने' (१.२.५/१२९४) इति [3]पुंसोऽपि स्त्रीलिङ्गता, तेन नत्वं न भवति, चञ्चाः पश्य, [4]वध्रिकाः पश्य इति। तस्मात् इति किम्? एतांश्चरतो गाः पश्य। शसः इति किम्? वृक्षाः। प्लक्षाः। पुंसि इति किम्? धेनूः। बह्वीः[5]। कुमारीः॥

## नादिचि। (१०४/१६८)

[6]अवर्णात् इचि[7] पूर्वसवर्णदीर्घो न भवति। वृक्षौ। प्लक्षौ। खट्वे। कुण्डे। आत् इति किम्? अग्नी[8]। इचि इति किम्? [9]वृक्षाः॥

## दीर्घाज्जसि च। (१०५/२३०)

दीर्घात् जसि इचि च परतः पूर्वसवर्णदीर्घः न भवति। कुमार्यौ। कुमार्यः। ब्रह्मबन्ध्वौ। ब्रह्मबन्ध्वः॥

## वा छन्दसि। (१०६/३५१५)

दीर्घात् छन्दसि विषये जसि च इचि[10] च परतो वा पूर्वसवर्णदीर्घो न भवति। 'मारुतीश्चतस्रः' (काठ सं.११.१०) पिण्डीः। मारुत्यश्चतस्रः पिण्ड्यः। 'वाराही' (मै. सं. ४.४.५)। उपानही। वाराह्यौ। उपानह्यौ॥

## अमि पूर्वः। (१०७/१९४)

अकः [11]इत्येव। अमि परतोऽकः पूर्वपरयोः [12]स्थाने पूर्वरूपमेकादेशो भवति। वृक्षम्। प्लक्षम्। अग्निम्। वायुम्। पूर्वग्रहणम् किम्? पूर्व एव यथा स्यात्, पूर्वसवर्णोऽन्तरतमो [13]मा भूत् इति, कुमारीम् इत्यत्र हि [14]त्रिमात्रः स्यात्। 'वा छन्दसि' (६.१.१०६/३५१५) इत्येव, शमीं च (काठ. ३६.६), शम्यं च। गौरीं च, गौर्यं च (ऋ. १०.१२६.८)॥

---

1. प्लक्षान् क. फ. 2. तृणमयः पुरुषः इत्यधिकम् ह, वर्धिकेव वर्धिका इत्यधिकम् क. 3. पुंसि इति ह. 4. वध्रकाः ड. 5. बुद्धीः कृतीः इत्यधिकम् क, वधूः इत्यधिकम् फ. 6. अवर्णान्तात् फ. ह. 7. परतः इत्यधिकम् क. फ. 8. वायू इत्यधिकम् क. ड. ग. 9. प्लक्षाः ग. 10. परतः इत्यधिकम् फ. 11. इति वर्तते ड. 12. स्थाने नास्ति फ. 13. दीर्घः इत्यधिकम् ब. 14. त्रिमात्रिकः क.